# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर –२०१८

| | | |
|---|---|---|
| *कक्षा- आचार्य:* (SEM- 1) | **प्रश्नपत्रम्-४** | *गुणा: -७०* |
| *विषय:-साहित्यम् (ध्वनिवर्ग:)* | *कोड-* CC 4.1.3<br>(NEW & OLD SYLLABUS) | *समय: - २ त: ५* |
| *दिनाङ्क:-१८-१२-२०१८* | *सन्दर्भग्रन्थ: - ध्वन्यालोक: द्वितीय: उद्योत:* | |

**प्रथमान्विति:**

**प्रश्न: १ द्वयोरेका कारिका व्याख्येया ।** ०५

१ *रसभावतदाभासतत्प्रशान्त्यादिरक्रम: ।*
*ध्वनेरातत्माङ्गिभावेन भासमानो व्यवस्थित: ॥*

२ *तमर्थवलम्बन्ते येऽङ्गिनं ते गुणा: स्मृता: ।*
*अङ्गाश्रितास्त्वलङ्कारा मन्तव्या : कटकादिवत् ॥*

**प्रश्न: २ यथाभिमत: द्वयोरेक: प्रश्न: संसाध्य: ।** १०

१ *अविवक्षितवाच्यस्य ध्वने: सभेदं सोदाहरणं वर्णनं कुरूत ।*

२ *अत्यन्ततिरस्कृतवाच्यध्वने: लक्षणं प्रितपाद्य '' गगनं च मत्तमेधं '' इत्युदाहरणं पुष्टीकुरुत ।*

**द्वितीयान्विति:**

**प्रश्न: ३ द्वयो: यथाभिमतामेकां कारिकां साधयत ।** ०५

१ *समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ।*
*स प्रसादो गुणो ज्ञेय: सर्वसाधारणक्रिय: ॥*

२ *तस्याङ्गानां प्रभेदा ये प्रभेदा: स्वगताश्च ये ।*
*तेषामानन्त्यमन्योन्यसम्बन्धपरिक्ल्पने ॥*

**प्रश्न: ४ कश्चिदेक प्रश्न: यथाग्रन्थ: विवेचनीय: ।** १०

१ *ओज: प्रसादयोर्लक्षणं सोदाहरणं विवेचयत ।*

२ *असंलक्ष्यक्रमव्यङ्ग्यध्वने: कथं भेदरहितत्वम् इति ध्वन्यालोककारस्य मतं प्रतिपादयत ।*

**तृतीयान्विति:**

**प्रश्न: ५ प्रदत्तयो: कारिकयो: काचिद् एका कारिका समाधेया ।** ०५

१ *रसाक्षिप्तया यस्य बन्ध: शक्यक्रियो भवेत् ।*
*अपृथग्ऽयत्ननिर्वत्य: सोऽलङ्कारो ध्वनौ मत: ॥*

२ *निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम् । रूपकादिरलङ्कारवर्गस्याङ्गत्व साधनम् । ।*

**प्रश्नः ६ प्रदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नःसमाधेयः ।** **१०**

१ *आक्षिप्त एवालङ्कार : शब्दशक्त्या प्रकाशते ।*

*यास्मिन्नुक्त शब्देन शब्दशक्त्युद्भवो हि सः।*

*इत्येनां कारिकां सोदाहरणं विशदयत ।*

२ *रसध्वन्यात्मके काव्ये अलङ्काराणां हेयोपादेयता कथं ज्ञायते इति ध्वनिकारमते विवेचयत ।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोप्रदत्तयो काचिदेका कारिका विवेचनीया ।** **०५**

१ *शब्दार्थशक्त्या क्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः ।*

*यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिर्ध्वने : ॥*

२ *रूपकादिरलङ्कारवर्गो यो वाच्यतां श्रितः ।*

*स सर्वो गम्यमानत्वं विभ्रद् भूम्ना प्रदर्शितः ॥*

**प्रश्नः ८ अधोप्रदत्तयोः कश्चिदेकः प्रश्न संसाध्यः ।** **१०**

१ *ध्वनिकारेण गुणीभूतव्यङ्ग्यस्य कतिभेदाः प्रदर्शिताः ?*

*कथं च तेषां गुणीभूतव्यङ्ग्यत्वमिति सोदाहरणं प्रकटयत ।*

२ *अर्थान्तरन्यासध्वनेः द्वैविध्यं यथाग्रन्थं विशदयत ।*

**प्रश्नः ९ केचन दशप्रश्ना : समाधेया : ।**

१ *कः परः प्रह्लादनो रसः ?*

२ *कीदृशं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ?*

३ *श्रुतिदुष्टादयो अनित्याः दोषाः कुत्र हेया : ?*

४ *यमकादिनिबन्धनम् शक्तावपि विशेषतः कुत्र प्रमादित्वम् ?*

५ *''वत्से मा गा विषादं '' अस्मिन् श्लोके शब्दशक्तिः वा अर्थशक्तिः ?*

६ *अर्थशक्तेः यत्रापि अन्यः अलङ्कारः प्रतीयते सः कः ?*

७ *ध्वन्यङ्गता कति प्रकारैः भवति ? के च ते प्रकाराः ?*

८ *अलङ्काराणां गतिः कतिविधा?*

९ *प्रतीयमानः कतिप्रकारकः ? ते के प्रकाराः ?*

१० *ध्वन्यालोकस्य द्वितीयोद्योते कति कारिकाः सन्ति ?*

११ *ध्वन्यालोके कति उद्योताः सन्ति ?*

१२ *आनन्दवर्धनाचार्यः कस्य सम्प्रदायस्य आचार्यः ?*

१३ *आनन्दवर्धनाचार्यस्य कति ग्रन्थाः सन्ति ?*

१४ *वाच्यवाचकचारूत्वहेतूनां रसादिपरता यत्र सः कस्य विषयः ?*

१५ *''वीराणां रमते घुसृणा --'' इति श्लोकः कस्य उदाहरणम् ? उपमाध्वनेः वा आक्षेपध्वनेः?*